સમશીતિર્મહીદાતેજા: પરબ્રહ્મ સનાતન:।
જાયતાઽજ્ઞાનકીનાથો વેદવેદ્યો મહામતિ:॥

Ankur Nagpal ankurnagpal108@gmail.com

॥ नमः श्रीजानकीजानये ॥

अथ भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्योपेता

# माण्डूक्योपनिषत्

हरिः ॐ ॥ ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ॥१॥

जाग्रत्काले य ईशो विविधमसुमतो भोजयत्यर्थजातं,
स्थूलं भुङ्क्ते स्वयं चाक्षिणि वसतिमुपादाय सङ्कर्षणात्मा ।
प्रद्युम्नः स्वप्नजातं तदनु च सुविविक्तं सुषुप्तेऽनिरुद्धो
यस्तुर्ये वासुदेवः स भवतु शरणं रामचन्द्रः ससीतः ॥१॥

आराध्यं ब्रह्मरुद्रादेर्जगद्धेतुं च मुक्तिदम् ।
दिव्यदेहं गुणाम्भोधिं रामं ब्रह्म समाश्रये ॥२॥

सूत्रवृत्तिकृतौ नत्वा व्यासबोधायनौ मुनी ।
श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ॥३॥

कुर्वे गुरुं नमस्कृत्य ज्ञानभक्तिदयानिधिम् ।
माण्डूक्योपनिषदो हि भाष्यमानन्दसंज्ञकम् ॥४॥

प्रणवावयवैरकारोकारमकारैः समस्तेन प्रणवेन च प्रतिपाद्यानां भगवत्स्वरूपाणामुपासनाऽनयोपनिषदा प्रतिपाद्यते । तस्या उपासनाया समष्ट्या व्यष्ट्या चालम्बनीभूतमोङ्कारं प्रथमं स्तौति "ओमित्येतदक्षरमिति"॥ "इति" पदमोङ्कारस्यानुकरणत्वद्योतकम् । एतच्छ्रावणप्रत्यक्षगोचरीभूतम् । ओमिति अक्षरं वर्णस्वरूपम् । इदं सर्वं चिदचिदात्मकं सर्वं जगत् तत्प्रतीति-



Scanned by CamScanner

**सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥२॥**

विषयभूतं चिद्रूपमचिद्रूपञ्च सर्वं जगद् ओमित्यक्षरमेव । ओङ्कार एवेत्यर्थः । अनेन सर्वस्य जगतः प्रणवविस्तारोक्त्या प्रणवस्तुतिर्व्यज्यते । संक्षेपतः सर्वस्य प्रणवत्वमुक्त्वा विशेषतो बिविनक्ति-तस्योपव्याख्यानमिति । तस्य प्रणवस्य उप उपपन्नम् । युक्तमित्येतत् । विशेषेण आ समन्तात् ख्यानं प्रकथनम् । समुपयुक्तं विवेचनमित्येतत् । किन्तदित्यत्राह-भूतमिति । भूतमतीतकालीनम् । भवत् वर्तमानकालीनम् । भविष्यद् अनागतकालीनम् । इति एवं रीत्या सर्वं कालत्रयावच्छिन्नं यद्यत्तत्सर्वमोङ्कार एव । ओङ्कारस्वरूपमेवेत्यर्थः । यत्र त्रिकालातीतं कालत्रयाऽपरिच्छिन्नं चिद्वस्तु अव्याकृतं प्रधानञ्च तदपि ओङ्कारस्वरूपमेवेत्यर्थः । ओङ्कारस्य ब्रह्मवाचकत्वाद् वाच्यवाचकयोश्चाभेदाध्यवसायाद् ब्रह्मणः शरीरभूतस्य सर्वस्य जगतः ब्रह्मात्मकत्वात् प्रणवात्मत्वकमपि जगतः समुच्यमानं न विरुध्यते । आलम्बनीभूतस्य प्रणवस्य माहात्म्यञ्चाख्यायत इति भावः ॥१॥

सर्वमोङ्कार एवेति वाचकप्राधान्येन पूर्वमुक्तम् । अधुना वाच्यप्राधान्येनापि तदुच्यते-सर्वं ह्येतदिति । एतद् दृश्यमानं सर्वं समग्रं भूतभविष्यद्भेदेन समवस्थितं जगद् ब्रह्मैव ब्रह्मात्मकमेव विनिश्चितमेतद् ब्रह्मविद्भिः । सर्वस्य परब्रह्मकार्यत्वात् तच्छरीरत्वाच्च । एतत् कथनेन वाच्यवाचकयोर्ब्रह्मप्रणवयोरभेदाध्यवसायः सूचितो भवति । अन्यथा पूर्वं प्रणवः सर्वम् अत्र ब्रह्मैव सर्वमिति विरुद्धकथनात् पूर्वापरवाक्ययोरसङ्गतार्थाभिधायकत्वमापद्येत । अयमात्मा ब्रह्म, अयम् अस्मदादिभिरहमितिप्रतीतिगोचरतयाऽनुभूयमान आत्मा जीवात्मा पूर्वमन्त्रे यच्च त्रिकालातीतमित्यनेनोक्तः कालत्रयापरिच्छिन्नः सोऽपि ब्रह्मैव ब्रह्मात्मक एवेत्यर्थः । अनेन समस्तप्रणवप्रतिपाद्यं परब्रह्मात्मकं भगवत्स्वरूपमुक्तं भवति । सम्प्रति प्रणवावयवप्रतिपाद्यानि भगवत्स्वरूपाणि वक्तुकामः समस्तप्रणवप्रतिपाद्यस्य भगवतश्चतुष्पात्त्वं प्रतिपादयति-सोऽयमात्मा चतुष्पादिति । स समस्तप्रणवप्रतिपाद्योऽयं सर्वनियामकतया तत्तद्देहेषु अवस्थितः आत्मा परमात्मा

## अथ द्वितीयः खण्डः

### जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः

चतुष्पात्। चत्वारः पादाः स्वरूपांशा यस्य स चतुष्पात्। चत्वारि अस्यांशभूतानि स्वरूपाणीत्यर्थः ॥२॥

इत्यथर्ववेदीयमाण्डूक्योपनिषदो भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्ये प्रथमः खण्डः ॥१॥

—०—

यत्र स्थित्वा जीवो जागर्त्ति तत्स्थानं जागरितं तदेव स्थानं यस्य तादृशोऽयं प्रथमः पादः। तच्च स्थानं दक्षिणस्य चक्षुषोऽग्रभागो दक्षिणाक्षिमुखे विश्व इत्युक्तेः। तत्र स्थित्वाऽयं परमात्मा जीवं स्थूलविषयान् भोजयतीत्यर्थः। बहिष्प्रज्ञो बहिर्बाह्यार्थेषु प्रज्ञा प्रज्ञापना यस्य स बहिष्प्रज्ञः। ज्ञाधातुरन्तर्भावितण्यर्थ इत्यर्थः। बाह्यार्थानयं ज्ञापयति जीवानां कृते इति भावः। सप्ताङ्गः सप्त सप्तत्वसंख्यावन्ति अङ्गानि यस्य स सप्ताङ्गः तानि चाङ्गानि वैश्वानर विश्वोक्तानि द्युलोकसूर्यवायुव्योमरयिपृथिव्याहवनीयपदोक्तानि मूर्धचक्षुःप्राणशरीरमध्यभागमूत्राशयपादमुखरूपाणि समनुसन्धेयानि। श्रुतिर्भवति – "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा, सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ आस्यमाहवनीयः" (छा० अ० ५ खं० १८ मं० २) अस्य परमात्मनः पादस्य सर्वं स्थूलभूतं जगद् अङ्गसप्तकतया विवक्षितमिहेति भाव;। पुनरयं कीदृश इत्यत्राह–एकोनविंशतिमुखः। एकोनविंशतिसंख्याकानि मुखानि उपलब्धिः कर्मणश्च द्वाराणि यस्य सः। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च प्राणाः प्राणापानसमानोदानव्यानाः। चत्वार्यन्तःकरणानि चेत्येतैरयं स्थूलानर्थान् भुङ्क्ते भोजयति जीववर्गमिति भावः। स्थूलभुक् स्थूलान् बाह्यान् पदार्थान् भुंक्ते भोजयति चेति स्थूलभुक्। वैश्वानरो नयतीति नरो नेता विश्वेषां समेषां जीवानां नरो विश्वानरः।

Scanned by CamScanner

**स्थूलभुग् वैश्वानरः प्रथमः पादः ॥१॥**

**स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥२॥**

**यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं**

नरे संज्ञायामिति दीर्घः। स एव वैश्वानरः चक्षुर्निष्ठान् सर्वान् जीवान् स्थूलभोगाय नयनकर्त्ताऽयमिति भावः। अयं समस्तप्रणवप्रतिपाद्यस्य भगवतः प्रथमः पादः प्रथमं स्वरूपमंशभूतं प्रणवावयवाकारप्रतिपाद्यमित्यर्थः ॥१॥

स्वप्नस्थानो यत्र स्थाने पुरीततो नाड्या मुखे वर्तमानो जीव ईशसृष्टान् स्वाप्नान् सूक्ष्मान् पदार्थान् अनुभवति तत्स्थानं स्वप्न इत्युच्यते। अधिकरणार्थे नङ् प्रत्ययः। स्वप्न एव स्थानं यस्य स स्वप्नस्थानो मनःप्रदेशस्थः। मनस्यन्तस्तु तैजस इत्युक्तेः। अन्तःप्रज्ञोऽन्तःशब्देन ईशसृष्टा सूक्ष्मा आन्तराः स्वप्नकालीनानुभवविषयाः पदार्था उच्यन्ते। तेषु प्रज्ञा ज्ञानानि ज्ञापनव्यापाराश्च यस्य सोऽन्तःप्रज्ञः। सूक्ष्मान् पदार्थान् जीववर्गाय ज्ञापयति स्वयमपि च जानातीत्यर्थः सप्ताङ्गः सूक्ष्मभूतः। सर्वं जगदङ्गसप्तकत्वेनेह विवक्षितम्। तानि चाङ्गानि वैश्वानरो विश्वोक्तानि सप्त द्युलोकादीन्येव। पूर्वमन्त्रे स्थूलत्वाभिमतानि इह तु सूक्ष्मत्वाभिमतानीति विवेकः। एकोनविंशतिमुखो व्याख्यानं पूर्ववत्। प्रविविक्तभुक् प्रविविक्तान् बाह्यार्थापेक्षया भिन्नान् सूक्ष्मान् स्वप्नकालीनानर्थान् भुङ्क्ते भोजयति च जीववर्गमिति प्रविविक्तभुक् तैजसः। तेजोऽत्र मनः तत्र वर्त्तमानत्वेन तत्सम्बन्धितया तैजस इत्युच्यते द्वितीयः पादः। समस्तप्रणवप्रतिपाद्यस्य परमात्मनः प्रणवावयवद्वितीयमात्रारूपोकारप्रतिपाद्यं द्वितीयं स्वरूपमिदमित्यर्थः ॥२॥

जागरितस्वप्नस्थानापेक्षया वैलक्षण्यं प्रदर्शयितुं सुषुप्तिस्थानस्य स्वरूपं पूर्वं दर्शयति–यत्र सुप्त इति। यत्र यस्मिन् स्थाने हृदयाकाशरूपे सुप्तः परमात्मना संश्लेषविशेषं गतः "प्राज्ञेनात्मना संपरिष्वक्तः" (बृ० ४।३।२१)

**पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽऽनन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥३॥**

इति श्रुतेः । एवंभूतो जीवः कञ्चन कमपि कामं मनोरथं न कामयते नेच्छति । कञ्चन कमपि स्वप्नं स्वाप्नमर्थं न पश्यति नावलोकयति । जाग्रत्स्वाप्नपदार्थज्ञानशून्यो भवतीत्यर्थः । तत् स्थानं सुषुप्तमित्युच्यत इत्यर्थः । सुषुप्तस्थानः सुषुप्तं स्थानमस्य स सुषुप्तस्थानो हृदयकमलकर्णिकाप्रस्थाकाशदेशस्थ इत्यर्थः । एकीभूतो ज्ञानानन्दादिकं यत् परमात्मनो रूपं तद्विशिष्टतया परमात्मना सह एकीभावं प्राप्तः । प्रज्ञानघनः प्रज्ञानं घनं घनीभूतं यस्य तादृशः । प्रसरणशीलं हि विषयेषु ज्ञानं प्रभावद् विश्लिष्टावयवं सदघनमित्युच्यते प्रसरणविमुखं तु संश्लिष्टावयवं सद् घनमित्युच्यते । प्रज्ञानशब्दश्च प्रज्ञानजननव्यापारपरः । सुषुप्तिस्थानस्थ प्राज्ञस्य भगवतो व्यापारस्तादृश एव भवति । यज्जीवस्य प्रज्ञानं बाह्येषु चान्तरेषु विषयेषु न प्रसरति आत्मस्वरूपमात्रे ज्ञानानन्दादौ प्रवर्तते । ज्ञानमत्र धर्मभूतं संकोचविकासशालि प्रभावद् द्रव्यमिति स्वसिद्धान्तानुगतमेव । अत एव प्राज्ञाख्यो भगवान् विज्ञानघन इत्युच्यते । एवकारेण इतरविषयज्ञानजननव्यापारराहित्यमुच्यते । एतावन्तं सुखमहस्वाप्सं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शदर्शनात् । जीवस्य स्वस्वरूपमानन्दरूपं कालोऽज्ञानश्च इति त्रयोऽत्र विषयाः स्फुरन्ति । एतेष्वेव तदीयज्ञानप्रसरो नान्यत्रेति घनप्रज्ञानो जीवः तादृशज्ञानजननव्यापारवत्त्वात् प्राज्ञः प्रज्ञानघन इतिभावः । आनन्दमय आनन्दप्राचुर्यविशिष्टः । पूर्णानन्दो भगवान् प्राज्ञ इत्यर्थः । हिशब्द आनन्दमयत्वप्रसिद्धिसूचकः । पूर्णानन्दता तु शास्त्रेषु भगवतः प्रसिद्धेत्यर्थः । आनन्दभुक् । आनन्दं भुंक्ते भोजयति च जीववर्गमसौ प्राज्ञः । नायमानन्दो वैषयिकः किन्तु स्वरूपानन्दः तत्प्रचुरत्वात् तद्भुक्त्वं न्याय्यमेव । चेतोमुखः । चेतःशब्दो नाहङ्कारिकचित्तवाची किन्तु ज्ञानवाची । चेतः स्वधर्मभूतज्ञानमेव मुखमानन्दकालाज्ञानोपलब्धिसाधनं यस्य तादृशः । न हि वैश्वानरतैजसवदयमेकोनविंशतिमुखः । स्वचैतन्यद्वारैव जीवस्यानन्दादिभोगयितृत्वं तद्भोक्तृत्वञ्चास्य भगवत इति भावः । प्राज्ञः प्रकृष्टं

Scanned by CamScanner

**एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाऽप्ययौ हि भूतानाम् ॥४॥**

**नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं**

विषयान्तरेभ्यः समुत्कृष्टं स्वस्वरूपमानन्दमासमन्ताज्जानाति ज्ञापयति चेति प्राज्ञः। ज्ञाधातुरन्तर्भावितण्यर्थोऽपि पक्षान्तरे। तृतीयः पादः प्राज्ञ एव समस्तप्रणवप्रतिपाद्यस्य प्रणवावयवमकारप्रतिपाद्यमंशभूतं तृतीयं स्वरूपमित्यर्थः ॥३॥

एष यदीयं पादत्रयं वर्णितम्। वर्णनीयश्चाग्रेऽवशिष्टश्चतुर्थः पादः स एष चतुष्पात् समस्तप्रणवप्रतिपाद्यः परमात्मा। सर्वेश्वरः सर्वेषां चिदचिद्वस्तूनामीश्वर ईशिता। एष सर्वज्ञः चतूरूपः परमात्मा य एष प्रकृतः स सर्वविषयकज्ञानवान्। एषोऽन्तर्यामी एष प्रकृत एव परमात्मा अन्तःस्थः सन् सर्वान् नियमयति। अन्तरनुप्रवेशेन नियमनकर्ता सर्वेषामेतदतिरिक्तो नास्तीत्यर्थः। एष योनिः सर्वस्य सर्वस्य योनिरुपादानकारणम्। एतेन सांख्यतार्किकसंमतौ प्रधानपरमाणूपादनतावादौ निरस्तौ भवतः। प्रभवाऽप्ययौ हि भूतानां हि यस्माद्धेतोरयं सर्वस्य योनिः तस्माद् भूतानां प्रभवश्चाप्ययश्चेति प्रभवाप्ययौ। प्रभवन्ति भूतानि यस्मादसौ प्रभवः। अप्येति यस्मिन्नित्यप्ययः। सर्वभूतोत्पत्तिप्रलयहेतुरयमेव चतुष्पात् परमात्मेति भावः। प्रकृतस्य परमात्मनो महिमाऽयं चतुर्थपादनिरूपणात् प्रागेव वर्णितः साधकस्य श्रद्धातिशयोत्पादाय ॥४॥

प्रकृतस्य परमात्मनो महिमानमुपवर्ण्य सम्प्रति तदीयं तुरीयं पादं वर्णयति–नान्तरिति। नान्तःप्रज्ञं स्वप्नकालीनसूक्ष्मार्थरूपान्तरपदार्थप्रज्ञापनं हि व्यापारस्तैजसस्य पूर्वमुक्तः तुरीये स नास्तीत्यर्थः। अन्तः प्रज्ञमित्यादीनि सर्वाणि द्वितीयान्तपदानि चतुर्थमित्यस्य विशेषणीभूतानि। विग्रहस्तु पूर्ववदिहाप्यनुसन्धेयः। न वहिःप्रज्ञं बाह्यार्थप्रज्ञापनव्यपारो वैश्वानरो न तादृशस्तुरीयः तद्व्यापारस्यात्राभावादित्यर्थः। नोभयतःप्रज्ञं जाग्रत्स्वप्नयोरन्तरालेऽपि काचिद् दशाऽनुभूतये सर्वैर्यत्र बाह्यमपि पदार्थं

Scanned by CamScanner

**नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं**

शब्दादिकमनुभवति शयानः स्वाप्नांश्च पदार्थान् पश्यति स व्यापारो न केवलस्य वैश्वानरस्य तैजसस्य वा किन्त्वंशत उभयस्य। सोऽपि व्यापारः तुरीये नास्ति। विग्रहस्तु उभयतो बाह्यानान्तरांश्च पदार्थान् प्रजानाति प्रज्ञापयति च स उभयतःप्रज्ञः तद्भिन्नोऽयं तुरीयः। न प्रज्ञानघनं न प्रज्ञं प्राज्ञो हि भगवान् प्रज्ञानघनः प्रज्ञश्च भवति घनीभूतप्रज्ञानजननव्यापारवत्वात् प्रकृष्टस्यात्मसुखस्य प्रज्ञापनव्यापारवत्वाच्च तुरीयस्तु न तादृशः तदीयव्यापारद्वयस्य तुरीयेऽभावादत एव नायं प्रज्ञानघनो न वा प्रज्ञः। प्राज्ञवैलक्षण्यं पदद्वयेन तुरीयस्य प्रदर्शितम्। किं तर्ह्ययं तुरीयः सर्वव्यापाररहित एवेत्याशंकायामाह—न प्रज्ञं न प्रजानाति प्रज्ञापयति च सोऽप्रज्ञ इत्युच्यते। जड इत्येतत्। न तादृशोऽयं तुरीयः किन्तु स्वयं चैतन्यविशिष्टः सन् मुक्तात्मभ्यः सर्वज्ञानं ददातीत्यस्य व्यापारः। स्वयञ्चायं सर्वज्ञ एवेत्यर्थः। "न हि विज्ञातुर्विज्ञातेर्विपरिलोप" इति श्रुतेः। अदृष्टं ज्ञानेन्द्रियाऽविषयममुक्तैरदृश्यत्वात्। मुक्तात्मदृश्यत्वन्त्वस्यास्त्येवेति भावः। अत एव अव्यवहार्यं यो हि दृष्टो न भवति स कथं व्यवहर्णीयः। अर्थक्रियारूपस्य व्यवहारस्य दृष्टेष्वेव सम्भवादिति भावः। अग्राह्यं कर्मेन्द्रियागोचरं मनसोऽप्यगोचरमिति वा। अलक्षणं लक्ष्यते गम्यते विषय इद्रियासन्निकृष्टोऽप्यनेनेति लक्षणमनुमापकं लिङ्गं तत् जाग्रदादिप्रवृत्तिरूपमस्ति वैश्वानरादे रूपत्रयस्य तुरीयस्य तु तादृशं किमपि लिङ्गं नास्ति येन तदनुमितिः शक्यसंभवा स्यादतोऽयमलक्षण इत्युच्यते। अचिन्त्यमत एवायं न चिन्तयितुं योग्यः। इन्द्रियगोचरत्वेऽनुमतिगोचरत्वे व्यवहार्यत्वे वा वस्तुनो ध्यानापरपर्याया चिन्ता सम्भवति। नायं तथेत्यचिन्त्य एवेति भावः। अव्यपदेश्यं व्यपदेष्टुं शब्दैः प्रतिपादयितुं योग्यो व्यपदेश्यः तद्भिन्नोऽव्यपदेश्यः तुरीयस्तु शब्देनापि व्यपदेशं नार्हति अयमीदृश इति। नन्वेवं तुरीय अप्रामाणिक एव भवेद् अदृष्टादारभ्याव्यपदेश्यान्तविशेषणविशिष्टस्य केनापि प्रमाणेनावगन्तुमशक्यत्वादित्याशङ्कायामाह—ऐकात्म्यप्रत्यय-

मन्यन्ते स आत्मा स विज्ञेयः ॥५॥

सारम्। अतति आप्नोति वा सर्वं यः स आत्मा। सर्वव्यापी परिपूर्णश्च यः स आत्मेति तदर्थः। एकश्चासौ आत्मा एकात्मा। ईदृशः परिपूर्णः सर्वव्यापी पदार्थं एक एवेति भावः। एकात्मा एव ऐकात्म्यम्। स्वार्थे ष्यञ्। तस्य प्रत्ययः श्रुतिजन्यं ज्ञानम् "आत्मेत्येवोपासीत" "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिनिकरजन्य ऐकात्म्यप्रत्यय इत्येतत्। अयमेव सारः प्रमापको यस्य स ऐकात्म्यप्रत्ययसारः। सृ गतौ इति धातोर्ज्ञानार्थत्वाश्रयणात्। श्रुतिभ्यो जायमानः परिपूर्णः सर्वव्यापक आत्मा एक एवेति प्रत्यय एवात्र तुरीये प्रमाणमतो नायमप्रमाणिक ईदृशविशेषण-विशिष्टोऽपीति भावः। प्रपञ्चमुपशमयतीति प्रपञ्चोपशमस्तम्। जीवस्य सर्वविधबन्धरूपः प्रपञ्चोऽस्य तुरीयस्य परिज्ञाने विनश्यतीति तुरीयः प्रपञ्चो-पशम उच्यत इति भावः। शान्तमूर्मिषट्करहितम्। रागद्वेषादिगन्धविहीनमित्येतत्। शिवम् दुःखसम्पर्कशून्यत्वात्। अनपाय्यानन्दस्वरूपत्वाच्चायं तुरीयः शिव उच्यत इत्यर्थः। अद्वैतं चिदचिद्विशिष्टोऽयमेक एव नास्य समोऽधिको वा द्वितीयः कश्चिदस्तीति तुरीयोऽद्वैत इतीर्यते। "न तत्समश्चा-भ्यधिकश्च दृश्यत" इति श्रुतेः। चिदचिद्विशिष्टस्य परमात्मन एकस्यैव तत्वस्य सिद्धान्तसिद्धत्वादितिभावः। चतुर्थः मन्यन्ते। पूर्वोक्तविशेषण-विशिष्टं तुरीयपादं समग्रप्रणवप्रतिपाद्यस्य स्वरूपं मन्यन्त औपनिषद्रहस्यवे-त्तार इति शेषः। स आत्मा स विज्ञेयो यश्चतूरूपतया वर्णितः स एव आत्मा सर्वेषां चिदचितामतः परमात्मभूतः स एव विज्ञेयो विशेषेण यथाधिकारं विविधरूपतया समुपदिष्टो ज्ञेयः साक्षात्कार्यं उपासनाद्वारा। यत्साक्षात्कारेण सर्वबन्धविनिर्मुक्तिर्भवति मुमुक्षूणामुपासकानामित्यर्थः ॥५॥

इत्यथर्ववेदीयमाण्डूक्योपनिषदो भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्ये

द्वितीयः खण्डः ॥२॥

## अथ तृतीयः खण्डः

**सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥१॥**

**जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा आप्ते-**

ओङ्कारप्रतिपाद्यस्यात्मनः चत्वारि रूपाणि प्रदर्शितानि द्वितीये खण्डे सम्प्रति तेषां स्वरूपाणां प्रतिपादक ओङ्कारस्य कस्कोंऽश इति विविनक्ति —सोऽयमिति। सः चतुष्पात्त्वेन वर्णितोयमात्मा प्रकृतः परमात्मेत्यर्थः। अध्यक्षरमक्षरं वर्णस्वरूपमधिकृत्येत्यध्यक्षरमक्षरस्वरूपे ओङ्कार ओङ्काररूपः। वाच्यवाचकयोरभेदाध्यवसायादात्मन ओङ्काररूपतेति तात्पर्यम्। ओङ्कार-रूपेणाक्षरेण समुच्यमानत्वादयमात्मा ओङ्कार एवेति भावार्थः। अधिमात्रं मात्रामधिकृत्येत्यधिमात्रम्। मात्रारूपेण तस्य चतुष्पादरूपस्यात्मनः पादा वर्तन्त इत्यर्थः। आत्मनो ये पादा त ओङ्कारस्य मात्रा इति कथमित्या-शङ्कायामाह—पादा मात्रा मात्राश्च पादा इति। य आत्मनः पादा विश्वादयः त एव ओङ्कारस्य मात्रा याश्चोङ्कारस्य मात्राः ता एवात्मनः पादाः प्रणव-मात्राणामेवात्मनः पादाभिधायकत्वादभिधानाभिधेययोश्चाभेदाध्यवसायात्। कास्ताः प्रणवस्य मात्रा या आत्मनः पादान् विश्वादीनभिदधतीत्याशंकायामाह —अकार उकारो मकार इति योऽयमकार उकारो मकारश्च प्रणवावयवा येषां सन्धौ प्रणवरूपनिष्पत्तिर्भवति "ओमि"ति ते एव मात्रा इत्युच्यन्ते तासामेवा-त्मनः पादाभिधायकत्वात् पादरूपता भवति पादानामात्मांशत्वं मात्राणाञ्च प्रणवांशत्वमित्यंशत्वरूपसामान्यान्मात्रासु पादत्वमिति भावः ॥१॥

सामान्यतो मात्रासु पादाभिधायकत्वात् पादत्वमुक्तं सम्प्रति विशिष्य कस्यां मात्रायां किम्पादत्वमिति वदति—जागरितेति। जागरितस्थानो दक्षिणचक्षुरप्रभागवर्ती वैश्वानर एतदाख्यः समग्रप्रणवप्रतिपाद्यस्यात्मनः प्रथमपादभूतो यः स प्रणवस्य प्रथमा मात्रा अकारः। अकारोकारमकारेषु

Scanned by CamScanner

**रादिमत्वाद्वाऽऽप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद ॥२॥**

**स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंतति समानश्च भवति नाऽस्या-**

प्रथमपाठादकारस्य प्रथमत्वं तैजसप्राज्ञापेक्षया च विश्वस्य प्रथमत्वम्। अकारो हि विश्वस्य वाचकः तस्मादकारे विश्वत्वमुक्तभिति भावः। वैश्वानरस्य अकारस्य साधारणधर्मे अकारे वैश्वानरत्वाप्तिनिमित्तं दर्शयति–वैश्वानरोपासनायामकारस्याऽऽलम्बनत्वं सम्पादयितुमाप्तेरिति। आप्तिर्व्यापनम्। व्याप्नोति सर्वां वाचमकारः "अकारो वै सर्वा वाग्" इति श्रुतेः। वैश्वानरोऽपि व्याप्नोति सर्वमर्थजातं द्युलोकादीनां तदीयमूर्धत्वादिश्रुतेः। एतेन व्यापकत्वं समानो धर्मे उभयोः कथितः। आदिमत्वाद् आदिः प्रथमं स्थानम्। तद् यस्याऽस्तीत्यादिमान् अकारस्योकारमकारापेक्षया प्रणवपाठक्रमेण प्रथमस्थानवत्वादादिमत्वम्। विश्वस्य तु तैजसप्राज्ञापेक्षया प्रथमस्थाने वर्तमानत्वादादिमत्वम्। अतो द्वयोः सामान्यो धर्मो द्वितीय आरोपनिमित्तभूत उक्तः। अनेन धर्मद्वयेनोभयोः सादृश्यादकारे विश्वत्वमारोपितं भवति तथा चाकारालम्बनेन विश्वरूपं परमात्मनः स्वरूपमुपासनीयमिति फलति। एवमुपासनायां यत्फलमुपासकस्य भवति तन्निर्दिशति–आप्नोतीत्यादिना। य उपासक एवं वेद अकारालम्बनमुपासनं भगवतो वैश्वनरस्य कुरुते स सर्वान् कामानाप्नोति। आदिश्च भवति प्रथमो भवति। महता सम्माननीयोऽयं भवति लोके इत्यर्थः ॥२॥

स्वप्नस्थानस्तैजसो यः समस्तप्रणवप्रतिपाद्यस्य भगवतो द्वितीयोंऽशः स प्रणवस्य द्वितीया मात्रा। द्वितीयां मात्रामालम्ब्य तैजसोपासना विधेयेत्यर्थः। केयं द्वितीया मात्रेत्यत्राह–उकार इति। उकार एव प्रणवस्य द्वितीया मात्रेत्यर्थः। तैजसोपासना कथमुकारमालम्ब्य कार्येति शंकानिराकरणाय धर्मद्वयसाम्यरूपं निमित्तं दर्शयति–उत्कर्षादिति। उत्कर्षादुत्कृष्टत्वात्। उत्कृष्टत्वं हि तैजसस्य विश्वापेक्षयाऽस्ति। जीवगतदुष्परित्यज्यदेहाभिमानपरित्यागहेतुत्वात्। विश्वो जीवगतं देहभिमानं न त्याजयतीति

**ब्रह्मवित् कुले भवति य एवं वेद ॥३॥**

**सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा**

विशेषः । अकारापेक्षयोकारोऽपि भवत्युत्कृष्टो देहाभिमानपरित्यागहेतु-तैजसवाचकत्वादत उत्कर्षो धर्मः समानो द्वयोरस्ति । उभयत्वाद्वा उभयत्वमपि द्वयोः समानो धर्मः । उभयत्वञ्चोभयसम्बन्धित्वम् । अस्ति च तत् तैजसस्य विश्वप्राज्ञयोर्द्वयोर्मध्यवर्तित्वात् । उकारोऽपि प्रणवावयवाकारमकारमध्यवर्तित्वादुभयसम्बन्धी भवत्येवेति धर्मद्वयं समानमुकारालम्बनतैजसोपासनायां निमित्तमस्तीति भावः । एवमुकारालम्बनमुपासनं तैजसस्य भगवतो यः करोति तस्य किं फलं भवतीति दर्शयति—उत्कर्षतीत्यादिना । य उपासक एवं वेद उत्कृष्टत्वोभयत्वनिमित्तकमुकारालम्बनं तैजसोपासनं कुरुते स ज्ञानसन्ततिं ज्ञानधारामुत्कर्षति वर्धयति शिष्यप्रशिष्यपरम्पराऽनुवर्तनात् । समानश्च भवति समानो मानसहितो भवति ब्रह्मज्ञानिनां मध्ये । शत्रुमित्रयोर्वा समानस्तुल्यो भवति । अस्य तैजसोपासकस्य ब्रह्मज्ञानिनः कुले कश्चिदपि पुत्रपौत्रादिरब्रह्मविद् ब्रह्मज्ञानविधुरो न भवति । जनकस्येवास्याऽपि कुले सन्तानपरम्परा ब्रह्मज्ञानविशिष्टैव जायत इत्यर्थः ॥३॥

सुषुप्तस्थानः प्राज्ञो यो भगवतः समस्तप्रणवप्रतिपाद्यस्य तृतीयोंऽशः स प्रणवस्य तृतीया मात्रा तृतीयमात्रायामालम्बनीभूतायां भगवतः प्राज्ञस्योपासनं विधेयमित्यर्थः । कासौ तृतीया मात्रेत्यात्राह मकार इति । मकार एव प्रणवस्य तृतीया मात्रा यः प्राज्ञोपासनायामलम्बनीय इति भावः । मकारस्य प्राज्ञोपासनालम्बनतायां निमित्तद्वयमाह—मितेरपीतेर्वेति । मितिर्मानम् । प्राज्ञो विश्वतैजसौ सुषुप्तिदशायां स्वतादात्म्यापन्नौ करोति तस्मान्मिनोतीत्युच्यते । तस्मान्मितिः प्राज्ञधर्मः । मकारोऽपि झटित्योमित्यस्योच्चारणकालेऽकारोकारौ स्वतादात्म्यापन्नाविव करोतीति मिनोतीत्युच्युतेऽतो मितिर्मकारस्यापि धर्मः । एवं मितिरपि द्वयोर्धर्मः । प्राज्ञः सुषुप्तिदशायां जाग्रत्स्वाप्नपदार्थानामप्ययं कुरुते । मकारोऽपि प्रणवोच्चारणे मकारोच्चारणकालेऽकारोकारयोरप्ययं कुरुते ।

मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥४॥

—०—

अथ चतुर्थः खण्डः

**अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशम शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद य एवं वेद ॥१॥**

अप्ययोऽत्र नाशः । तस्मादपीतिरपि द्वयोर्धर्मः । तत्साम्यान्मकारस्य प्राज्ञोपासनालम्बनत्वमिति भावः । एतद्धर्मद्वयनिमित्तेन मकारालम्बनकप्राज्ञोपासनाकर्तुः फलमुपदर्शयति— मिनोति ह वेति । य उपासक एवं वेद धर्मद्वयनिमित्तकं मकारालम्बनमुपासनं प्राज्ञस्य भगवतो विधत्ते स इदं सर्वं मिनोति सकलं जगत् स्वज्ञानशक्त्या व्याप्नोति । यथार्थतया ज्ञातुं प्रभवतीत्येतत् । अपीतिश्च भवति । अस्योपासकस्य सर्वदुःखक्षयो भवतीत्यर्थः । अङ्गस्तुतेरङ्गिस्तुतिपर्यवसायित्वात् प्रणवालम्बकं ब्रह्मोपासनमेव मुख्यमित्यत्र तात्पर्यमिति ॥४॥

इत्यथर्ववेदीयमाण्डूक्योपनिषदो भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्ये

तृतीयः खण्डः ॥३॥

---

अमात्रो न विद्यते मात्रा यस्य सोऽमात्र एवंभूतश्चतुर्थः । तुरीय आत्मेत्यर्थः । विश्वादयो हि मात्रालम्बना उपासनायामकारादिभिर्मात्राभिः प्रतिपाद्यमानत्वात् । चतुर्थस्त्वात्मा न मात्रालम्बनः समग्रप्रणवप्रतिपाद्यत्वादतस्तुरीयोऽमात्र उच्यते । अयमेवांशीत्यर्थः । तुरीयस्य विशेषणानि पूर्वोक्तान्येवानुवदति—अव्यवहार्यं इत्यादिना । पूर्ववदेवार्थोऽद्वैत इतिपर्यन्तविशेषणवाचकपदानाम् । एवमोङ्कार ओङ्कारोऽप्यमात्र एव । तुरीस्यालम्बनमित्यर्थः । समग्रं प्रणवालम्बनं तुरीस्योपासनं कर्तव्यमिति भावः । समग्रप्रणवालम्बनं भगवतस्तुरीयस्योपासनं यः कुरुते तस्य किं भवतीत्य-

आह—आत्मैवेत्यादिना । यः उपासक । एवं वेद समग्रं प्रणवमालम्बनं कृत्वा अव्यवहार्यत्वादिगुणगणविशिष्टं तुरीयमंशिनं भगवन्तमुपास्ते । स आत्मैव अहं ममताद्यभिमानपरित्यागपूर्वकं शुद्धस्वरूपो भूत्वा । आत्मना सर्वान्तरात्मभूतेन परमात्मना स्वस्मिन् प्रसीदता आत्मानं तुरीयपदवाच्यं समग्रोङ्कारप्रतिपाद्यं भगवन्तं संविशति प्राप्नोति । समग्रप्रणवप्रतिपाद्य-स्तुरीयोंशिस्वरूपः परमात्मा श्रीरामाख्यः तमेव साकेताख्यदेशविशेषगतं प्राप्नोति समग्रप्रणवालम्बनं तुरीयमुपासमान इति भावः ॥१॥

**जाग्रत्स्वप्नसुषुप्तिषु स्थितिपदं प्राप्तः स्वरूपैस्त्रिभि—**
**र्भुंक्ते भोजयते च जीवनिषहान् स्थूलान् विविक्तानन् ।**
**आनन्दं विषयानिमान् प्रणवमात्रोक्तोऽप्यमात्रश्च य—**
**स्तस्मै तुर्यपदाय सन्तु नतयो रामाय सद्ब्रह्मणे ॥१॥**

इत्यथर्ववेदीयमाण्डूक्योपनिषदो भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्ये चतुर्थः खण्डः ॥४॥

॥ समाप्तञ्चेदं माण्डूक्योपनिषद्भाष्यम् ॥



श्रीरामाय परब्रह्मणे नमः ।

जगद्गुरुश्रीपूर्णानन्दाचार्यप्रणीतः

# श्रीरामभक्तिविवेकः

गुरुं च राघवं नत्वा व्यासं बोधायनं तथा ।
रामभक्तिविवेकं हि कुर्वे भक्तिप्रदायकम् ॥१॥

रामभक्त्या समं नास्ति तारकं साधनं परम् ।
रामभक्तिं समाश्रित्य बहवो मुक्तिमाप्नुवन् ॥२॥

भक्त्यैव लभ्यते रामो नान्यथेति श्रुतेर्मतम् ।
स्नेहः सर्वाधिको रामे रामभक्तिरुदीरिता ॥३॥

रामधामप्रदा सैव सैव रामानुभाविका ।
नानासौख्यप्रदा सैव सैव मुक्तिप्रदायिका ॥४॥

सत्सङ्गत्या विवेकादिसाधनैः सप्तभिश्च सा ।
जन्यते भगवद्भक्तिरित्येतद् विदुषां मतम् ॥५॥

अपरा च परा चेति भक्तिः सा द्विविधा मता ।
अपरा च त्रिधा तत्र भक्तिविद्भिः प्रकीर्त्तिता ॥६॥

मानसी कायिकी चाथ वाचिकीति प्रभेदतः ।
मनसा क्रियते रामे सख्यं श्रद्धा स्मृतिश्च यत् ॥७॥

श्रीरामकिङ्करत्वस्य स्वस्मिंश्च भावनं सदा ।
रामे ब्रह्मणि चिन्तया च स्वयोगक्षेमकारिता ॥८॥

Scanned by CamScanner

देहचिन्तां विहायाथ श्रीरामाय निजार्पणम् ।
तत् प्रोक्ता मानसी रामभक्तिर्भक्तिविशारदैः ॥९॥
रामधामचरित्रादेर्वैष्णवाच्छ्रवणं तथा ।
श्रीराममन्दिरस्याथ निर्माणमार्जनादिकम् ॥१०॥
नीराद्याहरणं चाथ मालादेर्ग्रथनादिकम् ।
पाकं च रामचन्द्रार्थं पात्रादिशोधनं शुभम् ॥११॥
रामार्थं तुलसीपुष्पपादपानां च वर्धनम् ।
यत् षोडशोपचारैश्च रामस्यामोघपूजनम् ॥१२॥
साष्टाङ्गं च नमस्कारो राममूर्तेश्च रक्षणम् ।
तत् प्रोक्ता कायिकी रामभक्तिर्भक्तिविशारदैः ॥१३॥
रामनामगुणादीनां श्रद्धया कीर्त्तनं च यत् ।
अगतेः स्वस्य गत्यर्थं प्रार्थना राघवस्य च ॥१४॥
सन्निधौ रामचन्द्रस्य तद्दासत्वस्य याचनम् ।
सायं प्रातः स्तुतिश्चाथ रम्या रामस्य शार्ङ्गिणः ॥१५॥
श्रीरामे जनकत्वादिसम्बन्धकथनं च यत् ।
तत् प्रोक्ता वाचिकी रामभक्तिर्भक्तिविशारदैः ॥१६॥
नवधा श्रवणाद्या हि भगवद्भक्तयश्च याः ।
षोडशधा च पाद्मोक्तास्तुलसीधारणादयः ॥१७॥
अन्तर्भवन्ति चैतासु मानस्यादिषु भक्तिषु ।
अतस्ताश्चापराभक्तेर्भेदा बोध्याश्च साधकैः ॥१८॥
पराभक्तिरविच्छिन्नरामस्मृतिपरम्परा ।
साधनाख्याऽपराभक्तेरनन्तरं प्रजायते ॥१९॥

Scanned by CamScanner

सिद्धादयः पराभक्तेर्भेदा बुधैः प्रकीर्त्तिताः ।
सर्वेषामवबोधाय विविच्यन्तेऽत्र ताः शुभाः ॥२०॥
सिद्धा भक्तिस्तु स यत्र भक्तः स्मरति सर्वथा ।
न विस्मरति रामं सा सेवते तं सदिन्द्रियैः ॥२१॥
भस्मसात् कुरुते सिद्धा भक्तिः पापगणं तथा ।
यथा दहति भुक्तान्नं जाठराग्निर्हि सर्वथा ॥२२॥
प्रेमाभक्तौ तु भक्तस्य रोमाञ्चादिः प्रजायते ।
तादृग् भक्तो विनाश्याघं मृतः प्राप्नोति राघवम् ॥२३॥
निष्कामभक्तिमापन्नः सेवते राघवं मुदा ।
सालोक्यादि न गृह्णाति श्रीरामसेवनं विना ॥२४॥
दुर्लभां भक्तिमापन्नो विभुं रामं हि वन्दते ।
रामस्यैवास्म्यहं दासः सर्वदैवं स मन्यते ॥२५॥
रामात्मकं जगत् सर्वं भक्तश्रेष्ठः स पश्यति ।
न च तस्य प्रियः कश्चिन्न तस्य कश्चिदप्रियः ॥२६॥
अनन्योपासको भक्तः सर्वं चिदचिदात्मकम् ।
देहं रामस्य विज्ञाय सर्वं नमति सर्वदा ॥२७॥
श्रीरामोपासनं सेतुः सदाचार्यविनिर्मितः ।
तदारूढो जनो याति पारं संसारवारिधेः ॥२८॥
मानवीं तनुमापन्नो रामं भजति यो न हि ।
तापत्रयेण तप्तोऽसौ मूढोऽगतिर्विषीदति ॥२९॥
चिदानन्दार्यशिष्येण पूर्णानन्देन निर्मितः ।
रामभक्तिविवेकोऽयं भवताद् भक्तिबोधकः ॥३०॥

—०—

Scanned by CamScanner

३–श्रीरामानन्दग्रन्थमालायास्तृतीयं पुष्पम् ।

भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्योपेता

# ईशकेनकठप्रश्नमुण्डकमाण्डूक्य-तैत्तिरीयैतरेयोपनिषदः




संशोधकः–पण्डितसम्राट् स्वामी श्रीवैष्णवाचार्य
वेदान्तपीठाचार्य ( अहमदाबाद )

गुरुपूर्णिमा सन् १९६९ ई. } श्रीरामानन्दाब्द ६७० सर्वेऽधिकाराः स्वायत्तीकृताः { मूल्य ६/००

Scanned by CamScanner

प्रकाशक :–श्रीरामानन्दवेदान्तप्रचारकसमिति अहमदाबाद

प्रथमावृत्ति–१००० प्रति

मूल्य–६/००

प्राप्तिस्थान–१–श्रीरामानन्दवेदान्तप्रचारकसमितिकार्यालय
अहमदाबाद

२–श्रीमोतीलाल बनारसीदास
चौक–वाराणसी

સમષ્ટિનિર્મહાતેઽજ્ઞાઃ પરબ્રહ્મ (સનાતનઃ)
જયતાઽજ્ઞાનકી નાશો વેદવેદ્યો મહામુનિઃ॥

ankurnagpal108@gmail.com

मुद्रक :—वैद्यराज स्वामी श्रीत्रिभुवनदासजी शास्त्री
श्रीरामानन्दप्रिन्टिंगप्रेस
कांकरियारोड–अहमदाबाद–२२

Scanned by CamScanner